# Swayambhu Stotram Adoration of Twenty-four Tirthankaras

# સ્વયમ્ભૂસ્તોત્રમ્

## Document Information

Text title : Svayambhu Stotram by Acharya Samantabhadra

File name : svayambhUstotram.itx

Category : major_works, jaina

Location : doc_z_misc_major_works

Latest update : April 22, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# સ્વયમ્ભૂસ્તોત્રમ્

સ્વયમ્ભુવે નમસ્તુભ્યમ્ ।

અનુક્રમણિકા


૧. શ્રી ઋષભનાથ અથવા આદિનાથ જિન-સ્તુતિઃ
૨. શ્રી અજિતનાથ જિન-સ્તુતિઃ
૩. શ્રી શમ્ભવનાથ જિન-સ્તુતિઃ
૪. શ્રી અભિનન્દનનાથ જિન-સ્તુતિઃ
૫. શ્રી સુમતિનાથ જિન-સ્તુતિઃ
૬. શ્રી પદ્મપ્રભ જિન-સ્તુતિઃ
૭. શ્રી સુપાર્શ્વનાથ જિન-સ્તુતિઃ
૮. શ્રી ચન્દપ્રભ જિન-સ્તુતિઃ
૯. શ્રી સુવિધિનાથ જિન-સ્તુતિઃ
૧૦. શ્રી શીતલનાથ જિન-સ્તુતિઃ
૧૧. શ્રી શ્રેયાંસનાથ જિન-સ્તુતિઃ
૧૨. શ્રી વાસુપૂજ્ય જિન-સ્તુતિઃ
૧૩. શ્રી વિમલનાથ જિન-સ્તુતિઃ
૧૪. શ્રી અનન્તનાથ જિન-સ્તુતિઃ
૧૫. શ્રી ધર્મનાથ જિન-સ્તુતિઃ
૧૬. શ્રી શાન્તિનાથ જિન-સ્તુતિઃ
૧૭. શ્રી કુન્થુનાથ જિન-સ્તુતિઃ
૧૮. શ્રી અરનાથ જિન-સ્તુતિઃ
૧૯. શ્રી મલ્લિનાથ જિન-સ્તુતિઃ
૨૦. શ્રી મુનિસુવ્રત જિન-સ્તુતિઃ
૨૧. શ્રી નમિનાથ જિન-સ્તુતિઃ
૨૨. શ્રી નેમિનાથ જિન-સ્તુતિઃ
૨૩. શ્રી પાર્શ્વનાથ જિન-સ્તુતિઃ

૨૪. શ્રી મહાવીર જિન-સ્તુતિઃ

# સ્વયમ્ભૂસ્તોત્રમ્

## અથ સ્તોત્રમ્

### ૧. શ્રી ઋષભનાથ અથવા આદિનાથ જિન-સ્તુતિઃ

સ્વયમ્ભુવાં ભૂત-હિતેન ભૂતલે
 સમઞ્જસ-જ્ઞાન-વિભૂતિ-ચક્ષુષા ।
વિરાજિતં યેન વિધુન્વતા તમઃ
 ક્ષપાકરેણેવ ગુણોત્કરૈઃ કરૈઃ ॥ ૧॥

પ્રજાપતિર્યઃ પ્રથમં જિજીવિષૂઃ
 શશાસ કૃષ્યાદિષુ કર્મસુ પ્રજાઃ ।
પ્રબુદ્ધતત્ત્વઃ પુનરદ્ભુતોદયો
 મમત્વતો નિર્વિવિદે વિદાંવરઃ ॥ ૨॥

વિહાય યઃ સાગર-વારિ-વાસસં
 વધૂમિવેમાં વસુધા-વધૂં સતીમ્ ।
મુમુક્ષુરિક્ષ્વાકુ કુલાદિરાત્મવાન્
 પ્રભુઃ પ્રવવ્રાજ સહિષ્ણુરચ્યુતઃ ॥ ૩॥

સ્વ-દોષ-મૂલં સ્વ-સમાધિ-તેજસા
 નિનાય યો નિર્દય-ભસ્મસાત્ક્રિયામ્ ।
જગાદ તત્ત્વં જગતેઽર્થિનેઽઞ્જસા
 બભૂવ ચ બ્રહ્મ-પદામૃતેશ્વરઃ ॥ ૪॥

સ વિશ્વ-ચક્ષુર્વૃષ ભોઽર્ચિતઃ સતાં
 સમગ્ર-વિદ્યાઽઽત્મ-વપુર્નિરઞ્જનઃ ।
પુનાતુ ચેતો મમ નાભિ-નન્દનો
 જિનોઽજિત-ક્ષુલ્લક-વાદિ-શાસનઃ ॥ ૫॥

## ૨. શ્રી અજિતનાથ જિન-સ્તુતિઃ

યસ્ય પ્રભાવાત્ ત્રિદિવ-ચ્યુતસ્ય
ક્રીડાસ્વપિ ક્ષીબમુખાઽરવિન્દઃ
અજેય-શક્તિર્ભુવિ બન્ધુ-વર્ગ-
શ્ચકાર નામાઽજિત ઇત્યબન્ધ્યમ્ ॥ ૬॥

અદ્યાઽપિ યસ્યાઽજિતશાસનસ્ય
સતાં પ્રણેતુઃ પ્રતિમઙ્ગલાર્થમ્ ।
પ્રગૃહ્યતે નામ પરમ-પવિત્રં
સ્વસિદ્ધિ-કામેન જનેન લોકે ॥ ૭॥

યઃ પ્રાદુરાસીત્પ્રભુ-શક્તિ-ભૂમ્ના
ભવ્યાઽઽશયાલીન-કલઙ્ક-શાન્ત્યૈ ।
મહામુનિર્મુક્ત-ઘનોપદેહો
યથાઽરવિન્દાઽભ્યુદયાય ભાસ્વાન્ ॥ ૮॥

યેન પ્રણીતં પૃથુ ધર્મ-તીર્થં
જ્યેષ્ઠં જનાઃ પ્રાપ્ય જયન્તિ દુઃખમ્ ।
ગાઙ્ગં હ્રદં ચન્દન-પઙ્ક-શીતં
ગજ-પ્રવેકા ઇવ ધર્મ-તપ્તાઃ ॥ ૯॥

સ બ્રહ્મનિષ્ઠઃ સમ-મિત્ર-શત્રુ-
વિદ્યા-વિનિર્વાન્ત-કષાય-દોષઃ ।
લબ્ધાત્મલક્ષ્મીરજિતોઽજિતાત્મા
જિન શ્રિયં મે ભગવાન્ વિધત્તામ્ ॥ ૧૦॥

## ૩. શ્રી શમ્ભવનાથ જિન-સ્તુતિઃ

ત્વં શમ્ભવઃ સમ્ભવ-તર્ષ-રોગૈઃ
સન્તપ્યમાનસ્ય જનસ્ય લોકે ।
આસીરિહાઽઽકસ્મિક એવ વૈદ્યો
વૈદ્યો યથાઽનાથરુજાં પ્રશાન્ત્યૈ ॥ ૧૧॥

અનિત્યમત્રાણમહઙ્ક્રિયાભિઃ
પ્રસક્ત-મિથ્યાઽધ્યવસાય-દોષમ્ ।

ઇદં જગજ્જન્મ-જરાઽન્તકાર્તં
     નિરઞ્જનાં શાન્તિમજીગમસ્ત્વમ્ ॥ ૧૨॥

શતહ્રદોન્મેષ-ચલં હિ સૌખ્યં
     તૃષ્ણામયાઽપ્યાયન-માત્ર-હેતુઃ ।
તૃષ્ણાભિવૃદ્ધિશ્ચ તપત્યજસ્રં
     તાપસ્તદાયાસયતીત્યવાદીઃ ॥ ૧૩॥

બન્ધશ્ચ મોક્ષશ્ચ તયોશ્ચ હેતૂ
     બદ્ધશ્ચ મુક્તશ્ચ ફલં ચ મુક્તેઃ ।
સ્યાદ્વાદિનો નાથ! તવૈવ યુક્તં
     નૈકાન્તદૃષ્ટેસ્ત્વમતોઽસિ શાસ્તા ॥ ૧૪॥

શક્રોઽપ્યશક્તસ્તવ પુણ્યકીર્તેઃ
     સ્તુત્યાં પ્રવૃત્તઃ કિમુ માદૃશોઽજ્ઞઃ ।
તથાઽપિ ભક્ત્યા સ્તુત-પાદ-પદ્મો
     મમાર્ય ! દેયાઃ શિવતાતિમુચ્ચૈઃ ॥ ૧૫॥

## ૪. શ્રી અભિનન્દનનાથ જિન-સ્તુતિઃ

ગુણાઽભિનન્દાદભિનન્દનો ભવાન્
     દયા-વધૂં ક્ષાન્તિ-સખીમશિશ્રિયત્ ।
સમાધિ-તન્ત્રસ્તદુપોપપત્તયે
     દ્વયેન નૈર્ગ્રન્થ્ય-ગુણેન ચાઽયુજત્ ॥ ૧૬॥

અચેતને તત્કૃત-બન્ધજેઽપિ ચ
     મમેદમિત્યાભિનિવેશિક ગ્રહાત્ ।
પ્રભઙ્ગુરે સ્થાવર-નિશ્ચયેન ચ
     ક્ષતં જગત્તત્ત્વમજિગ્રહદ્ભવાન્ ॥ ૧૭॥

ક્ષુદાદિ-દુઃખ-પ્રતિકારતઃ સ્થિતિ-
     ર્ન ચેન્દ્રિયાર્થ-પ્રભવાઽલ્પ-સૌખ્યતઃ ।
તતો ગુણો નાસ્તિ ચ દેહ દેહિનો-
     રિતીદમિત્થં ભગવાન્ વ્યજિજ્ઞપત્ ॥ ૧૮॥

જનોઽતિલોપ્યનુબન્ધદોષતો

ભયાદકાર્યેષ્વિહ ન પ્રવર્તતે ।
ઇહાઽપ્યમુત્રાઽપ્યનુબન્ધદોષવિત્
કથં સુખે સંસજતીતિ ચાઽબ્રવીત્ ॥ ૧૯॥

સ ચાનુબન્ધોઽસ્ય જનસ્ય તાપકૃત્
તૃષોઽભિવૃદ્ધિઃ સુખતો ન ચ સ્થિતિઃ ।
ઇતિ પ્રભો ! લોક-હિતં યતો મતં
તતો ભવાનેવ ગતિઃ સતાં મતઃ ॥ ૨૦॥

## ૫. શ્રી સુમતિનાથ જિન-સ્તુતિઃ

અન્વર્થસંજ્ઞઃ સુમતિર્મુનિસ્ત્વં
સ્વયં મતં યેન સુયુક્તિ-નીતમ્ ।
યતશ્ચ શેષેષુ મતેષુ નાસ્તિ
સર્વ-ક્રિયા-કારક-તત્ત્વ-સિદ્ધિઃ ॥ ૨૧॥

અનેકમેકં ચ તદેવ તત્ત્વં
ભેદાઽન્વયજ્ઞાનમિદં હિ સત્યમ્ ।
મૃષોપચારોઽન્યતરસ્ય લોપે
તચ્છેષલોપોઽપિ તતોઽનુપાખ્યમ્ ॥ ૨૨॥

સતઃ કથઞ્ચિત્તદસત્ત્વ-શક્તિઃ
ખે નાસ્તિ પુષ્પં તરુષુ પ્રસિદ્ધમ્ ।
સર્વ-સ્વભાવ-ચ્યુતમપ્રમાણં
સ્વ-વાગ્વિરુદ્ધં તવ દૃષ્ટિતોઽન્યત્ ॥ ૨૩॥

ન સર્વથા નિત્યમુદેત્યપૈતિ
ન ચ ક્રિયા-કારકમત્ર યુક્તમ્ ।
નૈવાઽસતો જન્મ સતો ન નાશો
દીપસ્તમઃ પુદ્ગલભાવતોઽસ્તિ ॥ ૨૪॥

વિધિર્નિષેધશ્ચ કથઞ્ચિદિષ્ટૌ
વિવક્ષયા મુખ્ય-ગુણ-વ્યવસ્થા ।
ઇતિ પ્રણીતિઃ સુમતેસ્તવેયં
મતિ-પ્રવેકઃ સ્તુવતોઽસ્તિ નાથ ! ॥ ૨૫॥

## ૬. શ્રી પદ્મપ્રભ જિન-સ્તુતિઃ

પદ્મપ્રભઃ પદ્મ-પલાશ-લેશ્યઃ
 પદ્માલયાઽઽ લિઙ્ગિતચારુમૂર્તિઃ ।
બભૌ ભવાન્ ભવ્ય-પયોરુહાણાં
 પદ્માકરાણામિવ પદ્મબન્ધુઃ ॥ ૨૬॥

બભાર પદ્માં ચ સરસ્વતીં ચ
 ભવાન્ પુરસ્તાત્પ્રતિમુક્તિલક્ષ્મ્યાઃ ।
સરસ્વતીમેવ સમગ્ર-શોભાં
 સર્વજ્ઞ-લક્ષ્મીજ્વલિતાં વિમુક્તઃ ॥ ૨૭॥

શરીર-રશ્મિ-પ્રસરઃ પ્રભોસ્તે
 બાલાર્ક-રશ્મિચ્છવિરાઽઽલિલેપ ।
નરાઽમરાઽઽકીર્ણ-સભાં પ્રભા વાં
 શૈલસ્ય પદ્માભમણેઃ સ્વસાનુમ્ ॥ ૨૮॥

નભસ્તલં પલ્લવયન્નિવ ત્વં
 સહસ્રપત્રાઽમ્બુજ-ગર્ભચારૈઃ ।
પદાઽમ્બુજૈઃ પાતિત-માર-દર્પો
 ભૂમૌ પ્રજાનાં વિજહર્થ ભૂત્યૈ ॥ ૨૯॥

ગુણામ્બુધેર્વિપ્રુષમપ્યજસ્ય
 નાઽઽખણ્ડલઃ સ્તોતુમલં તવર્ષેઃ ।
પ્રાગેવ માદૃક્કિમુતાઽતિભક્તિ-
 મ બાલમાલાપયતીદમિત્થમ્ ॥ ૩૦॥

## ૭. શ્રી સુપાર્શ્વનાથ જિન-સ્તુતિઃ

સ્વાથ્યં યદાત્યન્તિકમેષ પુંસાં
 સ્વાર્થો ન ભોગઃ પરિભઙ્ગુરાત્મા ।
તૃષોઽનુષઙ્ગાન્ન ચ તાપશાન્તિ-
 રિતીદમાખ્યદ્ભગવાન્ સુપાર્શ્વઃ ॥ ૩૧॥

અજઙ્ગગમં જઙ્ગમ-નેય-યન્ત્રં

યથા તથા જીવ-ધૃતં શરીરમ્ ।
બીભત્સુ પૂતિ ક્ષયિ તાપકં ચ
સ્નેહો વૃથાઽત્રેતિ હિતં ત્વમાખ્યઃ ॥ ૩૨॥

અલઙ્ઘ્યશક્તિર્ભવિતવ્યતેયં
હેતુ-દ્વયાઽઽવિષ્કૃત-કાર્ય-લિઙ્ગા ।
અનીશ્વરો જન્તુરહઙ્ક્રિયાર્ત્તઃ
સંહત્ય કાર્યેષ્વિતિ સાધ્વવાદીઃ ॥ ૩૩॥

બિભેતિ મૃત્યોર્ન તતોઽસ્તિ મોક્ષો
નિત્ય શિવં વાઞ્છતિ નાઽસ્ય લાભઃ ।
તથાઽપિ બાલો ભય-કામ-વશ્યો
વૃથા સ્વયં તપ્યત ઇત્યવાદીઃ ॥ ૩૪॥

સર્વસ્ય તત્ત્વસ્ય ભવાન્ પ્રમાતા
માતેવ બાલસ્ય હિતાનુશાસ્તા ।
ગુણાઽવલોકસ્ય જનસ્ય નેતા
મયાઽપિ ભક્ત્યા પરિણયતેઽદ્ય ॥ ૩૫॥

## ૮. શ્રી ચન્દપ્રભ જિન-સ્તુતિઃ

ચન્દ્રપ્રભં ચન્દ્ર-મરીચિ-ગૌરં
ચન્દ્રં દ્વિતીયં જગતીવ કાન્તમ્ ।
વન્દેઽભિવન્દ્યં મહતામૃષીન્દ્રં
જિનં જિત-સ્વાન્ત-કષાય-બન્ધમ્ ॥ ૩૬॥

યસ્યાઙ્ગ-લક્ષ્મી-પરિવેશ-ભિન્નં
તમસ્તમોરેરિવ રશ્મિભિન્નમ્ ।
નનાશ બાહ્યં બહુ માનસં ચ
ધ્યાન-પ્રદીપાઽતિશયેન ભિન્નમ ॥ ૩૭॥

સ્વ-પક્ષ-સૌસ્થિત્ય-મદાઽવલિપ્તા
વાક્સિંહ-નાદૈર્વિમદા બભૂવુઃ ।
પ્રવાદિનો યસ્ય મદાર્દ્રગણ્ડા
ગજા યથા કેસરિણો નિનાદૈઃ ॥ ૩૮॥

યઃ સર્વ-લોકે પરમેષ્ઠિતાયાઃ
    પદં બભૂવાઽદ્ભુત-કર્મતેજાઃ ।
અનન્ત-ધામાઽક્ષર-વિશ્વચક્ષુઃ
    સમન્તદુઃખ-ક્ષય-શાસનશ્ચ ॥ ૩૯॥

સ ચન્દ્રમા ભવ્ય-કુમુદ્વતીનાં
    વિપન્ન-દોષાઽભ્ર-કલઙ્ક-લેપઃ ।
વ્યાકોશ-વાઙ્-ન્યાય-મયૂખ-માલઃ
    પૂયાત્પવિત્રો ભગવાન્મનો મે ॥ ૪૦॥

## ૯. શ્રી સુવિધિનાથ જિન-સ્તુતિઃ

એકાન્તદૃષ્ટિ-પ્રતિષેધિ તત્ત્વં
    પ્રમાણ-સિદ્ધં તદતત્સ્વભાવમ્ ।
ત્વયા પ્રણીતં સુવિધે ! સ્વધામ્ના
    નૈતત્સમાલીઢ-પદં ત્વદન્યૈઃ ॥ ૪૧॥

તદેવ ચ સ્યાન્ન તદેવ ચ સ્યાત્
    તથાપ્રતીતેસ્તવ તત્કથઞ્ચિત્ ।
નાઽત્યન્તમન્યત્વમનન્યતા ચ
    વિધેર્નિષેધસ્ય ચ શૂન્ય-દોષાત્ ॥ ૪૨॥

નિત્યં તદેવેદમિતિ પ્રતીતે-
    ર્ન નિત્યમન્યત્ પ્રતિપત્તિ-સિદ્ધેઃ ।
ન તદ્વિરુદ્ધં બહિરન્તરઙ્ગ-
    નિમિત્ત-નૈમિત્તિક-યોગતસ્તે ॥ ૪૩॥

અનેકમેકં ચ પદસ્ય વાચ્યં
    વૃક્ષા ઇતિ પ્રત્યયવત્પ્રકૃત્યા ।
આકાઙ્ક્ષિણઃ સ્યાદિતિ વૈ નિપાતો
    ગુણાઽનપેક્ષં નિયમેઽપવાદઃ ॥ ૪૪॥

ગુણ-પ્રધાનાર્થમિદં હિ વાક્યં
    જિનસ્ય તે તદ્ દ્વિષતામપથ્યમ્ ।
તતોઽભિવન્દ્યં જગદીશ્વરાણાં

મમાઽપિ સાધોસ્તવ પાદપદ્મમ્ ॥ ૪૫॥

## ૧૦. શ્રી શીતલનાથ જિન-સ્તુતિઃ

ન શીતલાશ્ચન્દનચન્દ્રરશ્મયો
ન ગાઙ્ગમમ્ભો ન ચ હારયષ્ટયઃ ।
યથા મુનેસ્તેઽનઘવાક્ય-રશ્મયઃ
શમામ્બુગર્ભાઃ શિશિરા વિપશ્ચિતામ્ ॥ ૪૬॥

સુખાઽભિલાષાઽનલ-દાહ-મૂર્ચ્છિતં
મનો નિજં જ્ઞાનમયાઽમૃતામ્બુભિઃ ।
વ્યદિધ્યપસ્ત્વં વિષ-દાહ-મોહિતં
યથા ભિષગ્મન્ત્ર-ગુણૈઃ સ્વ-વિગ્રહમ્ ॥ ૪૭॥

સ્વ-જીવિતે કામ-સુખે ચ તૃષ્ણયા
દિવા શ્રમાર્ત્તા નિશિ શેરતે પ્રજાઃ ।
ત્વમાર્ય ! નક્તં-દિવમપ્રમત્તવા-
નજાગરેવાઽઽત્મ-વિશુદ્ધ-વર્ત્મનિ ॥ ૪૮॥

અપત્ય-વિત્તોત્તર-લોક-તૃષ્ણયા
તપસ્વિનઃ કેચન કર્મ કુર્વતે ।
ભવન્પુનર્જન્મ-જરા-જિહાસયા
ત્રયીં પ્રવૃત્તિં સમધીરવારુણત્ ॥ ૪૯॥

ત્વમુત્તમ-જ્યાતિરજઃ ક્વ નિર્વૃતઃ
ક્વ તે પરે બુદ્ધિ-લવોદ્ધવ-ક્ષતાઃ ।
તતઃ સ્વનિઃ શ્રેયસ-ભાવનાપરૈ-
બુધ-પ્રવેકૈર્જિન ! શીતલેડ્યસે ॥ ૫૦॥

## ૧૧. શ્રી શ્રેયાંસનાથ જિન-સ્તુતિઃ

શ્રેયાન્ જિનઃ શ્રેયસિ વર્ત્મનીમાઃ
શ્રેયઃ પ્રજાઃ શાસદજેયવાક્યઃ ।
ભવાંશ્ચકાશે ભુવનત્રયેઽસ્મિ-
નેકો યથા વીત-ઘનો વિવસ્વાન્ ॥ ૫૧॥

વિધિર્વિષક્ત-પ્રતિષેધરૂપઃ
    પ્રમાણમત્રાઽન્યતરત્પ્રધાનમ્ ।
ગુણો પરો મુખ્ય નિયામહેતુ-
    ર્નયઃ દૃષ્ટાન્તસમર્થનસ્તે ॥ ૫૨॥

વિવક્ષિતો મુખ્ય ઇતીષ્યતેઽન્યો
    ગુણોઽવિવક્ષો ન નિરાત્મકસ્તે ।
તથાઽરિમિત્રાઽનુભયાદિશક્તિ
    દ્વયાઽવધેઃ કાર્યકરં હિ વસ્તુ ॥ ૫૩॥

દૃષ્ટાન્ત-સિદ્ધાવુભયોર્વિવાદે
    સાધ્યં પ્રસિદ્ધ્યેન્ન તુ તાદૃગસ્તિ ।
યત્સર્વથૈકાન્ત-નિયામિ દૃષ્ટં
    ત્વદીય-દૃષ્ટિર્વિભવત્યશેષે ॥ ૫૪॥

એકાન્ત-દૃષ્ટિ-પ્રતિષેધ-સિદ્ધિ-
    ન્યાયેષુભિર્મોહરિપું નિરસ્ય ।
અસિ સ્મ કૈવલ્ય-વિભૂતિ-સંરાટ્
    તતસ્ત્વમર્હન્નસિ મે સ્તવાઽર્હઃ ॥ ૫૫॥

## ૧૨. શ્રી વાસુપૂજ્ય જિન-સ્તુતિઃ

શિવાસુપૂજ્યોઽભ્યુદય-ક્રિયાસુ
    ત્વં વાસુપૂજ્યસ્ત્રિદશેન્દ્ર-પૂજ્યઃ ।
મયાઽપિ પૂજ્યોઽલ્પ-ધિયા મુનીન્દ્ર !
    દીપાર્ચિષા કિં તપનો ન પૂજ્યઃ ॥ ૫૬॥

ન પૂજયાઽર્થસ્ત્વયિ વીતરાગે
    ન નિન્દયા નાથ ! વિવાન્ત-વૈરે ।
તથાઽપિ તે પુણ્ય-ગુણ-સ્મૃતિર્નઃ
    પુનાતિ ચિત્તં દુરિતાઞ્જનેભ્યઃ ॥ ૫૭॥

પૂજ્યં જિનં ત્વાઽર્ચયતો જનસ્ય
    સાવદ્ય-લેશો બહુ-પુણ્ય-રાશૌ ।
દોષાય નાઽલં કણિકા વિષસ્ય

ન દૂષિકા શીત-શિવાઽમ્બુરાશૌ ॥ ૫૮॥

યદ્વસ્તુ બાહ્યં ગુણ-દોષ-સૂતે-
નિમિત્તમભ્યન્તર-મૂલહેતોઃ ।
અધ્યાત્મ-વૃત્તસ્ય તદઙ્ગભૂત-
મભ્યન્તરં કેવલમપ્યલં તે ॥ ૫૯॥

બાહ્યેતરોપાધિ-સમગ્રતેયં
કાર્યેષુ તે દ્રવ્યગતઃ સ્વભાવઃ ।
નૈવાઽન્યથા મોક્ષ-વિધિશ્ચ પુંસાં
તેનાભિવન્દ્યસ્ત્વમૃષિર્બુધાનામ્ ॥ ૬૦॥

## ૧૩. શ્રી વિમલનાથ જિન-સ્તુતિઃ

ય એવ નિત્ય-ક્ષણિકાદયો નયા
મિથોઽનપેક્ષાઃ સ્વ-પર-પ્રણાશિનઃ ।
ત એવ તત્ત્વં વિમલસ્ય તે મુનેઃ
પરસ્પરેક્ષા સ્વ-પરોપકારિણઃ ॥ ૬૧॥

યથૈકશઃ કારકમર્થ-સિદ્ધયે
સમીક્ષ્ય શેષં સ્વ-સહાય-કારકમ્ ।
તથૈવ સામાન્ય-વિશેષ-માતૃકા
નયાસ્તવેષ્ટા ગુણ-મુખ્ય-કલ્પતઃ ॥ ૬૨॥

પરસ્પરેક્ષાઽન્વય-ભેદ-લિઙ્ગતઃ
પ્રસિદ્ધ-સામાન્ય-વિશેષયોસ્તવ ।
સમગ્રતાઽસ્તિ સ્વ-પરાઽવભાસકં
યથા પ્રમાણં ભુવિ બુદ્ધિ-લક્ષણમ્ ॥ ૬૩॥

વિશેષ્ય-વાચ્યસ્ય વિશેષણં વચો
યતો વિશેષ્યં વિનિયમ્યતે ચ યત્ ।
તયોશ્ચ સામાન્યમતિપ્રસજ્યતે
વિવક્ષિતાત્સ્યાદિતિતેઽન્યવર્જનમ્ ॥ ૬૪॥

નયાસ્તવ સ્યાત્પદ-સત્ય-લાઞ્છિતા
રસોપવિદ્ધા ઇવ લોહ-ધાતવઃ ।

ભવન્ત્યભિપ્રેત-ગુણા યતસ્તતો
ભવન્તમાર્યાઃ પ્રણતા હિતૈષિણઃ ॥ ૬૫॥

## ૧૪. શ્રી અનન્તનાથ જિન-સ્તુતિઃ

અનન્ત-દોષાઽઽશય-વિગ્રહો ગ્રહો
વિષઙ્ગવાન્મોહ-મયશ્ચિરં હૃદિ ।
યતો જિતસ્તત્ત્વરુચૌ પ્રસીદતા
ત્વયા તતોઽભૂર્ભગવાનનન્તજિત્ ॥ ૬૬॥

કષાય-નામ્નાં દ્વિષતાં પ્રમાથિના-
મશેષયન્નામ ભવાનશેષવિત્ ।
વિશોષણં મન્મથ-દુર્મદાઽઽમયં
સમાધિ-ભૈષજ્ય-ગુણૈર્વ્યલીનયત ॥ ૬૭॥

પરિશ્રમાઽમ્બુર્ભય-વીચિ-માલિની
ત્વયા સ્વતૃષ્ણા-સરિદાઽઽર્ય ! શોષિતા ।
અસઙ્ગ-ધર્માર્ક-ગભસ્તિ-તેજસા
પરં તતો નિર્વૃતિ-ધામ તાવકમ્ ॥ ૬૮॥

સુહૃત્ત્વયિ શ્રી-સુભગત્વમશ્નુતે
દ્વિષંસ્ત્વયિ પ્રત્યયવત્ પ્રલીયતે ।
ભવાનુદાસીનતમસ્તયોરપિ
પ્રભો ! પરં ચિત્રમિદં તવેહિતમ્ ॥ ૬૯॥

ત્વમીદૃશસ્તાદૃશ ઇત્યયં મમ
પ્રલાપ-લેશોઽલ્પ-મતેર્મહામુને!
અશેષ-માહાત્મ્યમનીરયન્નપિ
શિવાય સંસ્પર્શ ઇવાઽમૃતામ્બુધેઃ ॥ ૭૦॥

## ૧૫. શ્રી ધર્મનાથ જિન-સ્તુતિઃ

ધર્મ-તીર્થમનઘં પ્રવર્તયન્
ધર્મ ઇત્યનુમતઃ સતાં ભવાન્ ।
કર્મ-કક્ષમદહત્તપોઽગ્નિભિઃ

શર્મ શાશ્વતમવાપ શઙ્કરઃ ॥ ૭૧॥

દેવ-માનવ-નિકાય-સત્તમૈ-
રેજિષે પરિવૃતો વૃતો બુધૈઃ ।
તારકા-પરિવૃતોઽતિપુષ્કલો
વ્યમનીવ શશ-લાઞ્છનોઽમલઃ ॥ ૭૨॥

પ્રાતિહાર્ય-વિભવૈઃ પરિષ્કૃતો
દેહતોઽપિ વિરતો ભવાનભૂત્ ।
મોક્ષમાર્ગમશિષન્નરામરાન્
નાઽપિ શાસન-ફલૈષણાઽઽતુરઃ ॥ ૭૩॥

કાય-વાક્ય-મનસાં પ્રવૃત્તયો
નાઽભવસ્તવ મુનેશ્ચિકીર્ષયા ।
નાઽસમીક્ષ્ય ભવતઃ પ્રવૃત્તયો
ધીર! તાવકમચિન્ત્યમીહિતમ્ ॥ ૭૪॥

માનુષીં પ્રકૃતિમભ્યતીતવાન્
દેવતાસ્વપિ ચ દેવતા યતઃ ।
તેન નાથ ! પરમાઽસિ દેવતા
શ્રેયસે જિનવૃષ! પ્રસીદ નઃ ॥ ૭૫॥

## ૧૬. શ્રી શાન્તિનાથ જિન-સ્તુતિઃ

વિધાય રક્ષાં પરતઃ પ્રજાનાં
રાજાં ચિરં યોઽપ્રતિમ-પ્રતાપઃ ।
વ્યધાત્પુરસ્તાત્સ્વત એવ શાન્તિ-
મુનિર્દયા-મૂર્તિરિવાઽઘશાન્તિમ્ ॥ ૭૬॥

ચક્રેણ યઃ શત્રુ-ભયઙ્કરેણ
જિત્વા નૃપઃ સર્વ-નરેન્દ્ર-ચક્રમ્ ।
સમાધિ-ચક્રેણ પુનર્જિગાય
મહોદયો દુર્જય-મોહ-ચક્રમ્ ॥ ૭૭॥

રાજ-શ્રિયા રાજસુ રાજ-સિંહો
રરાજ યો રાજ-સુભોગ-તન્ત્રઃ ।

આર્હન્ત્ય-લક્ષ્મ્યા પુનરાત્મ-તન્ત્રો
    દેવા સુરોદાર-સભે રરાજ ॥ ૭૮॥

યસ્મિન્નભૂદ્રાજનિ રાજ-ચક્રં
    મુનૌ દયા-દીધિતિ-ધર્મ-ચક્રમ્ ।
પૂજ્યે મુહુઃ પ્રાઞ્જલિ દેવ-ચક્રં
    ધ્યાનોન્મુખે ધ્વંસિ કૃતાન્ત-ચક્રમ્ ॥ ૭૯॥

સ્વદોષ-શાન્ત્યા વિહિતાઽઽત્મશાન્તિઃ
    શાન્તેર્વિધાતા શરણં ગતાનામ્ ।
ભૂયાદ્ભવ-ક્લેશ-ભયોપશાન્ત્યૈ
    શાન્તિર્જિનો મે ભગવાન્ શરણ્યઃ ॥ ૮૦॥

## ૧૭. શ્રી કુન્થુનાથ જિન-સ્તુતિઃ

કુન્થુ-પ્રભૃત્યખિલ-સત્ત્વ-દયૈકતાનઃ
    કુન્થુર્જિનો જ્વર-જરા-મરણોપશાન્ત્યૈ ।
ત્વં ધર્મ-ચક્રમિહ વર્તયસિ સ્મ ભૂત્યૈ
    ભૂત્વા પુરા ક્ષિતિપતીશ્વર-ચક્રપાણિઃ ॥ ૮૧॥

તૃષ્ણાઽર્ચિષઃ પરિદહન્તિ ન શાન્તિરાસા-
    મિષ્ટેન્દ્રિયાર્થ-વિભવૈઃ પરિવૃદ્ધિરેવ ।
સ્થિત્યૈવ કાય-પરિતાપ-હરં નિમિત્ત-
    મિત્યાત્મવાન્ વિષય-સૌખ્ય-પરાઙ્મુખોઽભૂત્ ॥ ૮૨॥

બાહ્યં તપઃ પરમ-દુશ્ચરમાચરસ્ત્વ-
    માધ્યાત્મિકસ્ય તપસઃપરિબૃંહણાર્થમ્ ।
ધ્યાનં નિરસ્ય કલુષ-દ્વયમુત્તરસ્મિન્
    ધ્યાન-દ્વયે વવૃતિષેઽતિશયોપપન્ને ॥ ૮૩॥

હુત્વા સ્વ-કર્મ-કટુક-પ્રકૃતીશ્ચતસ્રો
    રત્નત્રયાઽતિશય-તેજસિ જાત-વીર્યઃ ।
બભ્રાજિષે સકલ-વેદ-વિધેર્વિનેતા
    વ્યભ્રે યથા વિયતિ દીપ્ત-રુચિર્વિવસ્વાન્ ॥ ૮૪॥

યસ્માન્મુનીન્દ્ર ! તવ લોક-પિતામહાદ્યા

વિદ્યા વિભૂતિ કણિકામપિ નાપ્નુવન્તિ ।
તસ્માદ્ભવન્તમજમપ્રતિમેયમાર્યાઃ
સ્તુત્યં સ્તુવન્તિ સુધિયઃ સ્વ-હિતૈકતાનાઃ ॥ ૮૫॥

## ૧૮. શ્રી અરનાથ જિન-સ્તુતિઃ

ગુણ-સ્તોકં સદુલ્લઙ્ઘ્ય તદ્બહુત્વ-કથા સ્તુતિઃ ।
આનન્ત્યાત્તે ગુણા વક્તુમશક્યાસ્ત્વયિ સા કથમ્ ॥ ૮૬॥

તથાઽપિ તે મુનીન્દ્રસ્ય યતો નામાઽપિ કીર્તિતમ્ ।
પુનાતિ પુણ્ય-કીર્તેર્નસ્તતો બ્રૂયામ કિઞ્ચન ॥ ૮૭॥

લક્ષ્મી-વિભવ-સર્વસ્વં મુમુક્ષોશ્ચક્ર-લાઞ્છનમ્ ।
સામ્રાજ્યં સાર્વભૌમં તે જરત્તૃણમિવાઽભવત્ ॥ ૮૮॥

તવ રૂપસ્ય સૌન્દર્યં દૃષ્ટ્વા તૃપ્તિમનાપિવાન્ ।
દ્વયક્ષઃ શક્રઃ સહસ્રાક્ષો બભૂવ બહુ-વિસ્મયઃ ॥ ૮૯॥

મોહરૂપો રિપુઃ પાપઃ કષાય-ભટ-સાધનઃ ।
દૃષ્ટિ-સંવિદુપેક્ષાઽસ્ત્રૈસ્ત્વયા ધીર ! પરાજિતઃ ॥ ૯૦॥

કન્દર્પસ્યોદ્ધર દર્પ સ્ત્રૈલોક્ય-વિજયાર્જિતઃ ।
હે પયામાસ તં ધીરે ત્વયિ પ્રતિહતોદયઃ ॥ ૯૧॥

આયત્યાં ચ તદાત્વે ચ દુઃખ-યોનિર્દુરુત્તરા ।
તૃષ્ણા નદી ત્વયોત્તીર્ણા વિદ્યા-નાવા વિવિક્તયા ॥ ૯૨॥

અન્તકઃ ક્રન્દકો નૃણાં જન્મ-જ્વર-સખઃ સદા ।
ત્વામન્તકાઽન્તકં પ્રાપ્ય વ્યાવૃત્તઃ કામ-કારતઃ ॥ ૯૩॥

ભૂષા-વેષાઽઽયુધ-ત્યાગિ વિદ્યા-દમ-દયા-પરમ્ ।
રૂપમેવ તવાઽઽચષ્ટે ધીર ! દોષ-વિનિગ્રહમ્ ॥ ૯૪॥

સમન્તતોઽઙ્ગ ભાસાં તે પરિવેષેણ ભૂયસા ।
તમો બાહ્યમપાકીર્ણમધ્યાત્મં ધ્યાન તેજસા ॥ ૯૫॥

સર્વજ્ઞ-જ્યોતિષોદ્ભૂતસ્તાવકો મહિમોદયઃ ।
કં ન કુર્યાત્પ્રણમ્રં તે સત્ત્વં નાથ! સચેતનમ્ ॥ ૯૬॥

તવ વાગમૃતં શ્રીમત્સર્વ-ભાષા-સ્વભાવકમ્ ।

પ્રીણયત્યમૃતં યદ્વત્પ્રાણિનો વ્યાપિ સંસદિ ॥ ૯૭॥

અનેકાન્તાત્મદૃષ્ટિસ્તે સતી શૂન્યો વિપર્યયઃ ।
તતઃ સર્વં મૃષોક્તં સ્યાત્તદયુક્તં સ્વઘાતતઃ ॥ ૯૮॥

યે પર-સ્ખલિતોન્નિદ્રાઃ સ્વ-દોષેભ-નિમીલનાઃ ।
તપસ્વિનસ્તે કિં કુર્યુરપાત્રં ત્વન્મત-શ્રિયઃ ॥ ૯૯॥

તે તં સ્વઘાતિનં દોષં શમીકર્તુમનીશ્વરાઃ ।
ત્વદ્વિષઃ સ્વહનો બાલાસ્તત્ત્વાઽવક્તવ્યતાં શ્રિતાઃ ॥ ૧૦૦॥

સદેક-નિત્ય-વક્તવ્યાસ્તદ્વિપક્ષાશ્ચ યે નયાઃ ।
સર્વથેતિ પ્રદુષ્યન્તિ પુષ્યન્તિ સ્યાદિતીહ તે ॥ ૧૦૧॥

સર્વથા નિયમ-ત્યાગી યથાદૃષ્ટ મપેક્ષકઃ ।
સ્યાચ્છબ્દસ્તાવકે ન્યાયે નાન્યેષામાત્મવિદ્વિષામ્ ॥ ૧૦૨॥

અનેકાન્તોપ્યનેકાન્તઃ પ્રમાણ-નય-સાધનઃ ।
અનેકાન્તઃ પ્રમાણાત્તે તદેકાન્તોઽર્પિતાન્નયાત્ ॥ ૧૦૩॥

ઇતિ નિરુપમ-યુક્ત-શાસનઃ
    પ્રિય-હિત-યોગ-ગુણાઽનુશાસનઃ ।
અર-જિન ! દમ-તીર્થ-નાયક-
    સ્ત્વમિવ સતાં પ્રતિબોધનાય કઃ ? ॥ ૧૦૪॥

મતિ-ગુણ-વિભવાનુરૂપત-
    સ્ત્વયિ-વરદાઽઽગમ-દૃષ્ટિરૂપતઃ ।
ગુણ-કૃષમપિ કિઞ્ચનોદિતં
    મમ ભવતાદ્ દુરિતાસનોદિતમ્ ॥ ૧૦૫॥

## ૧૯. શ્રી મલ્લિનાથ જિન-સ્તુતિઃ

યસ્ય મહર્ષેઃ સકલ-પદાર્થ-
    પ્રત્યવબોધઃ સમજનિ સાક્ષાત્ ।
સાઽમર-મર્ત્યં જગદપિ સર્વં
    પ્રાઞ્જલિ ભૂત્વા પ્રણિપતતિ સ્મ ॥ ૧૦૬॥

યસ્ય ચ મૂર્તિઃ કનકમયીવ

સ્વ-સ્ફુરદાભા-કૃત-પરિવેષા ।
વાગપિ તત્ત્વં કથયિતુકામા
સ્યાત્પદ-પૂર્વા રમયતિ સાધૂન્ ॥ ૧૦૭॥

યસ્ય પુરસ્તાદ્વિગલિત-માના
ન પ્રતિતીર્થ્યા ભુવિ વિવદન્તે ।
ભૂરપિ રમ્યા પ્રતિપદમાસી-
 જ્જાત-વિકોશામ્બુજ-મૃદુ-હાસા ॥ ૧૦૮॥

યસ્ય સમન્તાજ્જિન-શિશિરાંશોઃ
શિષ્યક-સાધુ-ગ્રહ-વિભવોઽભૂત્ ।
તીર્થમપિ સ્વં જનન-સમુદ્ર-
ત્રાસિત-સત્ત્વોત્તરણ-પથોઽગ્રમ્ ॥ ૧૦૯॥

યસ્ય ચ શુક્લં પરમતપોઽગ્નિ-
ર્ધ્યાનમનન્તં દુરિતમધાક્ષીત્ ।
તં જિન-સિંહં કૃતકરણીય
મલ્લિમશલ્યં શરણમિતોઽસ્મિ ॥ ૧૧૦॥

## ૨૦. શ્રી મુનિસુવ્રત જિન-સ્તુતિઃ

અધિગત-મુનિ-સુવ્રત-સ્થિતિ-
મુનિ-વૃષભો મુનિસુવ્રતોઽનઘઃ ।
મુનિ-પરિષદિ નિર્બભૌ ભવા-
નુડુ-પરિષત્પરિવીત-સોમવત્ ॥ ૧૧૧॥

પરિણત-શિખિ-કણ્ઠ-રાગયા
કૃત-મદ-નિગ્રહ-વિગ્રહાભયા ।
તવ જિન ! તપસઃ પ્રસૂતયા
ગ્રહ પરિવેષ-રુચેવ શોભિતમ્ ॥ ૧૧૨॥

શશિ-રુચિ-શુચિ-શુક્લ-લોહિતં
સુરભિતરં વિરજો નિજં વપુઃ ।
તવ શિવમતિવિસ્મયં યતે !
યદપિ ચ વાઙ્મનસીયમીહિતમ્ ॥ ૧૧૩॥

સ્થિતિ-જનન-નિરોધ-લક્ષણં
    ચરમચરં ચ જગત્ પ્રતિક્ષણમ્ ।
ઇતિ જિન ! સકલજ્ઞ-લાઞ્છનં
    વચનમિદં વદતાંવરસ્ય તે ॥ ૧૧૪॥

દુરિત-મલ-કલઙ્કમષ્ટકં
    નિરુપમ-યોગ-બલેન નિર્દહન્ ।
અભવદભવ-સૌખ્યવાન્ ભવાન્
    ભવતુ મમાપિ ભવોપશાન્તયે ॥ ૧૧૫॥

## ૨૧. શ્રી નમિનાથ જિન-સ્તુતિઃ

સ્તુતિઃ સ્તોતુઃ સાધોઃ કુશલ-પરિણામાય સ તદા
    ભવેન્મા વા સ્તુત્યઃ ફલમપિ તતસ્તસ્ય ચ ।
કિમેવં સ્વાધીન્યાજ્જગતિ સુલભે શ્રાયસ-પથે
    સ્તુયાન્ન ત્વાં વિદ્વાન્સતતમભિપૂજ્યં નામ્મિ-જિનમ્ ॥ ૧૧૬॥

ત્વયા ધીમન્ ! બ્રહ્મ-પ્રણિધિ-મનસા જન્મ-નિગલં
    સમૂલં નિર્ભિન્નં ત્વમસિ વિદુષાં મોક્ષ-પદવી ।
ત્વયિ જ્ઞાન-જ્યોતિર્વિભવ-કિરણૈર્ભાતિ ભગવ-
    ન્નભૂવન્ ખદ્યોતા ઇવ શુચિરવાવન્યમતયઃ ॥ ૧૧૭॥

વિધેયં વાર્યં ચાઽનુભયમુભયં મિશ્રમપિ તદ્-
    વિશેષૈઃ પ્રત્યેકં નિયમ-વિષયૈશ્ચાપરિમિતૈઃ ।
સદાઽન્યોન્યાપેક્ષૈઃ સકલ-ભુવન-જ્યેષ્ઠ-ગુરુણા
    ત્વયા ગીત તત્ત્વં બહુ-નય-વિવક્ષેતર-વશાત્ ॥ ૧૧૮॥

અહિંસા ભૂતાનાં જગતિ વિદિતં બ્રહ્મ પરમં
    ન સા તત્રાઽઽરમ્ભોઽસ્ત્યણુરપિ ચ યત્રાઽઽ શ્રમવિધૌ ।
તતસ્તત્સિદ્ધ્યર્થં પરમ-કરુણો ગ્રન્થમુભયં
    ભવાનેવાઽત્યાક્ષીન્ન ચ વિકૃત-વેષોપધિ-રતઃ ॥ ૧૧૯॥

વપુર્ભૂષા-વેષ-વ્યવધિ-રહિતં શાન્ત-કરણં
    યતસ્તે સઞ્ચષ્ટે સ્મર-શર-વિષાઽઽતઙ્ક-વિજયમ્ ।
વિના ભીમૈઃ શસ્ત્રૈરદય-હૃદયાઽમર્ષ-વિલયં

તતસ્ત્વં નિર્મોહઃ શરણમસિ નઃ શાન્તિ-નિલયઃ ॥ ૧૨૦॥

## ૨૨. શ્રી નેમિનાથ જિન-સ્તુતિઃ

ભગવાનૃષિઃ પરમ-યોગ-
દહન-હુત-કલ્મષેન્ધનઃ ।
જ્ઞાન-વિપુલ-કિરણૈઃ સકલં
પ્રતિબુધ્ધ-કમલાયતેક્ષણાઃ ॥ ૧૨૧॥

હરિવંશ-કેતુરનવદ્ય-
વિનય-દમ-તીર્થ-નાયકઃ ।
શીલ-જલધિરભવો વિભવ-
સ્ત્વમરિષ્ટનેમિ-જિનકુઞ્જરોઽજરઃ ॥ ૧૨૨॥

ત્રિદશેન્દ્ર–મૌલિ-મણિ-રત્ન-
કિરણ-વિસરોપચુમ્બિતમ્ ।
પાદ-યુગલમમલં ભવતો
વિકસત્કુશેશય-દલાઽરુણોદરમ્ ॥ ૧૨૩॥

નખ-ચન્દ્ર-રશ્મિ-કવચાઽતિ-
રુચિર-શિખરાઽઙ્ગુલિ-સ્થલમ્ ।
સ્વાર્થ-નિયત-મનસઃ સુધિયઃ
પ્રણમન્તિ મન્ત્ર-મુખરા મહર્ષયઃ ॥ ૧૨૪॥

દ્યુતિમદ્રથાઙ્ગ-રવિ-બિમ્બ-
કિરણ-જટિલાંશુમણ્ડલઃ ।
નીલ-જલદ-જલ-રાશિ-વપુઃ
સહ બન્ધુભિર્ગરુડકેતુરીશ્વરઃ ॥ ૧૨૫॥

હલભૃચ્ચ તે સ્વજનભક્તિ-
મુદિત-હૃદયૌ જનેશ્વરૌ ।
ધર્મ-વિનય-રસિકૌ સુતરાં
ચરણાઽરવિન્દ-યુગલં પ્રણેમતુઃ ॥ ૧૨૬॥

કકુદં ભુવઃ ખચરયોષિ-
દુષિત-શિખરૈરલઙ્કૃતઃ ।

મેઘ-પટલ-પરિવીત-તટ-
    સ્તવ લક્ષણાનિ લિખિતાનિ વજ્રિણા ॥ ૧૨૭॥

વહતીતિ તીર્થમૃષિભિશ્ચ
    સતતમભિગમ્યતેઽદ્ય ચ ।
પ્રીતિ-વિતત-હૃદયૈઃ પરિતો
    ભૃશમૂર્જયન્ત ઇતિ વિશ્રુતોઽચલઃ ॥ ૧૨૮॥

બહિરન્તરપ્યુભયથા ચ
    કરણમવિઘાતિ નાઽર્થકૃત્ ।
નાથ ! યુગપદખિલં ચ સદા
    ત્વમિદં તલાઽઽમલકવદ્વિવેદિથ ॥ ૧૨૯॥

અત એવ તે બુધ-નુતસ્ય ચરિત-ગુણમદ્ભુતોદયમ્ ।
ન્યાય-વિહિતમવધાર્ય જિને
    ત્વયિ સુપ્રસન્ન-મનસઃ સ્થિતા વયમ્ ॥ ૧૩૦॥

## ૨૩. શ્રી પાર્શ્વનાથ જિન-સ્તુતિઃ

તમાલ-નીલૈઃ સધનુસ્તડિદ્ગુણૈઃ ।
    પ્રકીર્ણ-ભીમાઽશનિ-વાયુ-વૃષ્ટિભિઃ ।
બલાહકૈર્વૈરિ-વશૈરુપતો
    મહામના યો ન ચચાલ યોગતઃ ॥ ૧૩૧॥

બૃહત્ફણા-મણ્ડલ-મણ્ડપેન
    યં સ્ફુરત્તડિત્પિઙ્ગ-રુચોપસર્ગિણમ્ ।
જુગૂહ નાગો ધરણો ધરાધરં
    વિરાગ-સન્ધ્યા-તડિદમ્બુદો યથા ॥ ૧૩૨॥

સ્વ-યોગ-નિસ્ત્રિંશ-નિશાત-ધારયા
    નિશાત્ય યો દુર્જય-મોહ-વિદ્વિષમ્ ।
અવાપદાઽઽર્હન્ત્યમચિન્ત્યમદ્ભુતં
    ત્રિલોકપૂજાતિશયાઽઽસ્પદં પદમ્ ॥ ૧૩૩॥

યમીશ્વરં વીક્ષ્ય વિધૂત-કલ્મષં
    તપોધનાસ્તેઽપિ તથા બુભૂષવઃ ।

વનૌકસઃ સ્વ-શ્રમ-બન્ધ્ય-બુદ્ધયઃ
    શમોપદેશં શરણં પ્રપેદિરે ॥ ૧૩૪॥

સ સત્ય-વિદ્યા-તપસાં પ્રણાયકઃ
    સમગ્રધીરુગ્રકુલાઽમ્બરાંશુમાન્ ।
મયા સદા પાર્શ્વજિનઃ પ્રણમ્યતે
    વિલીન-મિથ્યાપથ-દૃષ્ટિ-વિભ્રમઃ ॥ ૧૩૫॥

## ૨૪. શ્રી મહાવીર જિન-સ્તુતિઃ

કીર્ત્યા ભુવિ ભાસિ તયા
    વીર! ત્વં ગુણ-સમુત્થયા ભાસિતયા ।
ભાસોડુસ ભાઽસિતયા
    સોમ ઇવ વ્યોમ્નિ કુન્દ-શોભાસિતયા ॥ ૧૩૬॥

તવ જિન ! શાસન-વિભવો
    જયતિ કલાવપિ ગુણાનુશાસન-વિભવઃ ।
દોષકશાસનવિભવઃ
    સ્તુવન્તિ પ્રભા-કૃશાસનવિભવઃ ॥ ૧૩૭॥

અનવદ્યઃ સ્યાદ્વાદસ્તવ
    દૃષ્ટેષ્ટાવિરોધતઃ સ્યાદ્વાદઃ ।
ઇતરો ન સ્યાદ્વાદો સદ્વિતય-
    વિરોધાન્મુનીશ્વરાઽસ્યાદ્વાદઃ ॥ ૧૩૮॥

ત્વમસિ સુરાસુર-મહિતો
    ગ્રન્થિકસત્ત્વાઽઽશયપ્રણામાઽમહિતઃ ।
લોક-ત્રય-પરમહિતો-
    ઽનાવરણજ્યોતિરુજ્જ્વલદ્ધામ-હિતઃ ॥ ૧૩૯॥

સભ્યાનામભિરુચિતં
    દધાસિ ગુણ-ભૂષણં શ્રિયા ચારુ-ચિતમ્ ।
મગ્નં સ્વસ્યાં રુચિતં
    જયસિ ચ મૃગ-લાઞ્છનં સ્વ-કાન્ત્યા રુચિતમ્ ॥ ૧૪૦॥

ત્વં જિન ! ગત-મદ-માય-

સ્તવ ભાવાનાં મુમુક્ષુ કામદ! માયઃ ।
શ્રેયાન્ શ્રીમદમાય-
સ્ત્વયા સમાદેશિ સપ્રયામદમાયઃ ॥ ૧૪૧॥

ગિરિભિત્ત્યવદાનવતઃ
શ્રીમત ઇવ દન્તિનઃ સ્ત્રવદ્દાનવતઃ ।
તવ શમ-વાદાનવતો
ગતમૂર્જિતમપગત-પ્રમાદાનવતઃ ॥ ૧૪૨॥

બહુગુણ-સમ્પદસકલં
પરમતપિ મધુર વચન-વિન્યાસ-કલમ્ ।
નય-ભક્ત્યવતંસ-કલં
તવ દેવ ! મતં સમન્તભદ્રં સકલમ્ ॥ ૧૪૩॥

ઇતિ શ્રીઆચાર્ય સમન્તભદ્ર સ્વામી વિરચિતં સ્વયમ્ભૂસ્તોત્રં સમ્પૂર્ણમ્ ।

---

*Swayambhu Stotram Adoration of Twenty-four Tirthankaras*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*